परनिर्ह्रासे ह्रूपमेव स्यात् । सर्वत्रासिद्धे च तस्य दोषः स्यागादिलोपलत्वणत्वेषु अयमर्थः क्वौ विधिं प्र
ति न स्थानिवत् लत्वमाव णाणोलोः णिविटिलोपः क्वौ णिलोपस्य तु भयंवकारस्य किंनिमित्ते ऊठि
कार्ये न स्थानिवत् यत्तायत्रोठ् स्यदिति वृद्धिः येतु क्वौ लुप्तं न स्थानिवदिति पठन्ति तेषामेतन्न स्यात्
तथापि पठेषते: क्वौ अतो लोपेन ऊं समकेवद्भवचने जमिकल्लत्वणोऽ जमिकृत्ते अतोलोपस्य स्थानि
वत्त्वनिषेधः स्यात् क्वौ कृतत्वात् इति तत्प्रसंगात् क्वौ विधिमिति पठेत्तन्नमः किंनिमित्ताभावाद्भवे न्येव
स्थानिवत्त्वं सर्वत्रापि किंनिमित्तकस्य णिलोपस्य स्थानिवत्त्वनिषेधेऽपि णिनिमित्तकस्य टिलोपस्य स्था
निवत्त्वप्रसंगाद्ध्येतदयपतेः इदं च हरदत्तग्रन्थे स्पष्टं कैयटेनापि क्वौ विधिं प्रतीत्यर्थो व्यवस्थितो न तु क्वौ
लुप्तमितीत्युक्तं क्वचित्क्वौ लुप्तमित्यप्यागृहीतमपि तथैव तन्नदर्शनात् अत एव व्याख्यातं व्यस्येति सूत्रे स्यावि
यते: सावी: लूनीयतेर्लूनीरिति भाष्ये सावीयादिभ्यः क्विपि कृते अलोपयलोपयोः श्वाः लोपस्य स्था
निवत्वादिकारस्य यणाभावा ततो यलोपे स्थानिवत्त्वनिषेधादादिष्टाद्वः सर्वत्वात्स्थानिवत्त्वात्संज्ञा
ह्वायलोपः स्यादित्याशंक्य क्वौ लुप्तं न स्थानिवदिति समाधत्ते कैयटः अत्र लोपादादेशा एव न स्थानिव
द्यु^ दिति प्रत्ययमाश्रित्य आदिष्टादचः स्था क्रमम् देवयतेर्द्युरिति तत्र भयथापि सिद्ध्यतीति हरदत्तः ननु क्वौ
ति^ विधिं प्रतीत्येते ऊठ् सिद्धान्ते तथापि न स्थानिवद्भावानादिष्टाद्वः सर्वत्वात्सिलोपस्य स्थानिवत्त्वाद्द्वो
गुणौ तो निवृत्तिः स्यात् तस्मात्क्वौ लुप्तमित्यवश्यमाश्रयणीयं अत एव इदं तत् क्वौ लुप्तस्योदाहरणं दे
वयतेर्द्युरिति कैयटेनोक्तम् तत्र उभयथापीति च न स्थानिवद्भावे सर्वत्रमानाभावस्योक्तत्वात्

नचण्तद्धयेपि त्यपलक्षणेनतदग्रहित्यत्र हृदि हृदीरेतिवाच्यं वहिरंगस्य रूपेण हृद्विग्रहत्वसिद्धत्वात् तथाच
प्र· स्थानिवद्भावे सत्यपि न क्षतिः नचैकदेशविकृतन्यायेन तदिव त्र्यादित्यस्यापत्तिः निरनुबंधपरिभाषया
सि·सु· अपानुग्रहणात् उक्तैर्वीत समाधानस्य भाष्याववरूपमाणत्वात् इदं च सर्वं मार्ईधाने केरति परसमीपद्वे वि
२२ षयसमसमीत्वन्नलोपस्य परनिमित्तकत्वाभावात् नस्थानिवद्वप्रसक्तिरितिबोध्यं ध्वनितं चैवदं लोपोव्यो
रितिसूत्रे यलोपाच्छिलोपयोर्विप्रतिषेधं वदता भाष्यकृता तदुपपादयता कैयटेन चेति स्पष्टमाकरविदा
लकालभेनस्थानिवत् आमलक्याः फलमामलकं नित्यं वृद्धशरादिभ्य इति मयट् फलेलुक लुक
हि तलुकीति ङीषो लुक् परतः भिन्नकोयस्येति वेत्यलोपेनस्थानिवत् अन्यथास्थानिवद्भावादीका
रस्य परत्वमत्वकारलोपः स्यात् फलेलुकप्रत्याख्यानपक्षे तु पंचभिःपट्टीभिः क्रीतः पंचपटुः पंच
इन्द्राण्यः अग्न्याद्यदेवता अस्य पंचेंद्रः पंचाग्निः आग्नेयाद्यादित्ति ढक् तस्याग्रहद्विगोरितिलुक् अनेनेगान्तपी
च^ तित्यायेन यणः एवं तत्स्वहृत्ताव पिस्थानिवत्त्वाणाप्रसंगः अविरविकन्यायेन पञ्चशाङ्गदेवत्तत्र ढक्
नतु पट्टीशह्मादितिकल्पनेवप्रतिपत्तिगौरवं नवभस्याफ्तेत्तद्धितइति पुंवद्भावः भस्मा विन्यवततद्धि
धानादत्रतलुकितदभावात् ठक् छसोश्चेत्यस्यापि लमनालमेप्रत्ययलक्षणाभावेनउलेभत्वात् द्वि
तीयपुंवद्भावविरहात्स्यष्टउदाहरणं सापस्य देवता त्यण् द्विगोर्लुगनपत्ये इति लुक् ततोङीषालुक् न
तसनिपुत्कपकारश्चोकारस्यअपेन नचसंनियोगशिष्टन्यायेन निवृत्तिः तद्धितलुकि परेस्त्रीप्रत्ययलु
कोविहितत्वया तन्निमित्ताया अपि निवृत्तेः स्वपूर्वयोरैकारान्तगागमयोर्निवृत्तौ कार्यायां अवः परस्मिन्नि २२
तिस्थानिवत्वप्रवृत्तेः केचित्तु वेरेयत्र वरईइ तिप्रश्लेषात् ईकारेपरतो विधौ न स्थानिवदिति व्याख्याय

२

प्रकृतवार्त्तिके लुग्ग्रहणं नारब्धमिति वदंति स्पष्टं चैतत्परमं चेर्य्याम् । यथा लोके कृतेन स्थानिवत् पारिशेषः अत्र
स्याप्रतिषेधापादनात्तु वा नवर्त्तिके गृहीतेन निमित्तकस्याल्लोपस्य स्थानिवद्भावात्त्वेकारोपधत्वाभावात् । दके द्वा
ककांतत्वोपधादिति ठञेन स्यात् उपधासंज्ञायाः पूर्वविधित्वात् न च पटयतीत्यादौ टिलोपस्य स्थानिवद्भाव
निषेधात् पकाराकारस्योपधासंज्ञायां सत्यां अतः उपधायाः इति वृद्धिप्राप्तिरिति वाच्यं उपधासंज्ञा निबंधनप्रत्ययवि
धावेवोक्तनिषेधप्रवृत्तेरिति निसिद्धांतात् न चैवं सौवीवलाकार इति यलोपो दाहरणे यथा विधौ स्थानिवत्त्वनिषेधा
देवन स्यात् थामिशब्दमिथाने भाष्येकदेशमिति वाच्यं अनाश्रयाद्वाश्मात्रत्वात् न च यो वैनेकदिशि त्वपात्तानुतौप प
कस्याः णाःनिमित्तको द्वितीयस्य वाः कारस्य [illegible]ङीनिमित्तको लोपः न तु द्वयस्यापि यकारलोपे स्थानिवत्व
निषेधः द्वितीयलोपस्य त्वाभीयत्वात्समानाश्रयत्वात्समानाश्रयत्वाच्चोः सिद्धत्वाययकारस्योपधासंज्ञायां
न लोपसिद्धेः तथा वोपधात्वं यलोपे वोगुक्तेन तु ग्रन्थयविधावितियलोपस्य वैसौवीत्युदाहरणमिति स्प
ष्टम् वः. पातिर्कृतः सब्रूः निमित्तकौ क्तसः वादित्त्वं तत्प्रयोजितत्वात् अनुवीवदद्वीणां परिवादकेन प्रथम
णिवोलोपस्य स्थानिवत्वे सत्याकारस्यानुपधात्वात् णौ च संश्चङ्युपधायाः इति ह्रस्वो न स्यात् यल्लोपे वः. परो द्विती
यणिचत्तदेशसंवेधित्वस्याकारत्प्रपायामनुपधायामभावात् प्रथमणिजेन संवेधित्वस्य सत्वेपि प्रथमणिव
च्छः पस्त्वाभावात् एवं वाणिणामतन्तकरोति णितासं. अवीवदत् इकारलोपेन स्थानिवत् न च नालोपी
ति निषेधः परत्वात् हैलमं त्वादि टिलोपस्य त्वभ्युपगमात् अनयवहलं कलयोरदंत इति पातयिष्यते ऊतवपि
न स्थानिवत् अवयते रोगणादिकः कप्रत्ययः अवकः पावयतेः क्विप् पाक्तिः वोः ऊठिति कृते प्रतिणिलोपेन
स्थानिवत् ऊत्वप्रपलत्वाणां लोहयतेर्लौह्ये दोहयतेर्दोग्धिः पाञ्चयते याणिः वेणायतेर्वेणिरिति वोधेच ऊ

ला ^

प्र. सि. 23 ह्रोपादानमप्यस्यैवासिद्धीयेनस्थानिवद्भिद्येतनम् कत्वात नदपिन्यायसिद्धं अवः परस्मिन्नित्यतिदेशंप्रतिवैय्यर्थ्याद्दि
कस्याः सिद्धतयानद्विर्वत्तदप्रवृत्तेः नवरामस्त्यादौविसर्गोनस्यात न्यायसाम्येनस्थानिवत्त्वस्याप्यप्रवृत्तेरि
तिवाच्यं प्रत्ययइत्यादिज्ञापकेनतत्प्रवृत्तेः नचैवंद्विर्वचनसवर्णानुस्वारदीर्घत्वचर्विधिष्वेवेनोपादेयाइतिवाच्यं
इष्टापत्तेः नथाचवार्तिके द्विर्वचनादीनिचवरेयलोपस्वरवर्जमितिस्यादेनत दीर्घग्रहणस्यापरित्यागेस्यलानतीये
दीर्घविधौस्थानिवत्त्वापत्त्याविस्रम्भलोरितिस्वेच्छेपदं नास्मिन्नताद्दशानिविवित्तिप्रशंशामि प्रशामीतिसवैरू
दाहृतंनसिध्यत नचदीर्घग्रहणसामर्थ्यं प्रहीडीत्येतदर्थत्वात प्रहीडीत्यत्रनिहत्यर्थत्वाव नथाहि देहृग्र
नादे दादेः फसःहिउयति अत्रविस्रम्भलोः कृतयोर्ढत्वविकल्पस्यैवविधाने प्रहिडि प्रहीडीतिस्यात
दीर्घत्व अहिडि प्रहीडीतिरूपमितिकैयटादौस्पष्टं अत्राढःगीतिनास्येकाग्रहीनाप्रशामीति यद्दुगंताव
शंशामीतिसिद्धं यदि. नलुकिवाग्रंथस्वरयोरविशेषात्ग्रहितमित्याद्यपिसर्वस्मेद्विर्वौस्थानिवत्त्वावेनणि
चाव्यवधानेग्रहो ऽलिटीतिदीर्घस्यप्रवृत्तेः नवसूत्रमतेदीर्घविधौस्थानिवत्त्वावनिषेधात्तत्रदीर्घोऽपुर्वीरः
विहितविशेषणाश्रयणात एतेननरीगृहीतेत्यपि व्याख्याने साधवावार्यले यद्दुगंतानुहेलजादाविटो
दीर्घः नाग्रहीतेत्यादिरस्याङ्गः नत्वाङ्गः हिः प्रयोगेद्विर्वचनेऽर्धहुंइतिसिद्धंतानुदेविहितत्वं यङ्लुकोऽनैमित्तिक
तया ऽन्कलादेशानयालुकालुम नाचस्थानिवत्त्वावापिनेति तस्याशयः एतच्चभाष्यकैयटविरुद्धं एको
चोहइतिसूत्रेद्विग्रहेवेगादितिभाष्यव्याख्यायांकैयटेनोक्तं नरीगृहीत्यनेनत्वत्रग्रहेर्विहितेयदाइयानकमितिवि
हितविशेषणात्रदीर्घः त्वचोनरीगृहीत्यत्रांगे नत्वग्रहेः विशेषणसामर्थ्याद्दियथाप्राप्ततया श्रयणमितिर २३
देवयथापिपठ प्रक्रमणोक्तं नथापिपड्लुक्यपिनदीर्घइतितदभिप्रायोन्यायसाम्यादिति ॥ ॥

नौस्तुवं
नत्वाभवा
त्यदनानु
वद ३

श्चेदेवक्कचे यङ्. लुकः किंविन्निमित्तकत्वाभावेन ततु नत्वं प्रत्ययेन्यतो बाधकाभावात्. यथाकृतस्यापग्रहे
विहितत्वान्नयायात. न च हि त्वादि प्रवृत्त्यनन्तरमेवार्द्धधातुकोत्पत्तिः अन्तरंगत्वाच्चार्द्धधातुकस्यैवोत्पत्तेः य
ङ. नेतु गरलापोहे नन्तरमेवार्द्धधातुकोत्पत्त्या यथाकृतस्य पग्रच्च्यावः इति वेष स्य नवजनीगृहित्वागामिति के
पट विरोधः यङ्सपग्रहे इगन्तत्वाभावेव तत्रात्यर्थात. यङ्. लोपस्य परनिमित्तकत्वा यथास्तुतेवाधात. नत्स
वं जनीगरलापाहात तत्रितितेनैवोक्तत्वाच्च. श्रलुवात त्वयङः स्वयमभावात्नयात विभिन्नं हित्वादिसर्वमेव लु
कि तु प्रत्ययलक्षणाय पेतस्यहित्वादेः पश्चादेव प्रवृत्तिरिति माधवाणयः यङोः लिटीति सत्रेव पकान्यहणा
स्यहरत् तेनानुवर्तितत्वात् पियप्यायङ्. लुगंते दीर्घप्रवृत्तिस्तथोक्तसूत्रे इति दिक् तस्य दोषः संयोगादिलोपलत्व
णत्वेषु तस्य पूर्वोक्तनिषेधस्य तेन सूलेत्वयेपूर्वत्रासिद्धिरिष्यत निवत्तप्रवृत्तिरित्यर्थः तेन काकथं वास्यर्थेः २०
पी ^ स्यत्र पदांतेयः संयोगान्तस्य यवयोः सकाररकारयोः स्कोरितिलोपोन न स्कोरित्यत्र फलंः स्यान्नवृत्ता
तस्य च कोविस्यत्र व्यभिचारं तेवैयर्थ्यात्त उपसर्जने पि संयोगे विशेषता नयाफलं तोयः संयोगान्तयोः स्को
लोपः स्यात्था हद्विं गत्वयायणो ः सिद्धत्वाद्वानाय मतिप्रसंगः इति वेन्न कुस्मयतेः क्विपि कूरिति माधवाच्युदाह
तस्मात्तुपपत्तिप्रसंगात संयोगादीत्यस्मात्तु पादानेसंयोगादिलोपेणालोपस्यानिवत्ताव नेषेर्यपतेः इथ्ये
ति माधवाव्याख्यायां सर्वे ग्रासिद्धेन स्यात् निवदितिनास्ति संयोगादियदस्य संयोगो परत्ति तलोपो यलत्वा
त्वादिति कैयटोक्तेः सर्वेपत्ताभिप्राय वर्णानमात्रपरत्वात नयदांत सूत्रपोषे स्कंदयते स्कन्नलद्वयते ... णि ली ^
तितेनैनोक्तत्वात यत्तसिद्धकांडसूत्वकत्वे इति वा तिकव्याख्याने ... ततः क्विपि मधुगितीष्यते मधुरिति
स्रमोनोतिनितेतोकं तत्र पकावापदेशमात्रपर्यात् संयोगादिलोपइतिभावः स... [illegible]
स्थो ^ न्न

प्र॰ स्वसमनुष्योतनीनत्रशीनगिस्यग्रहस्याचविनार्थत्वमितिवाच्यं क्नौलमंनस्थानिवदितिसमाधेयत्वात् कुस्मयनौतस्यामर्थ्याभा

सि॰ स॰ वात्संयोगांतलोपस्यैवप्रहृतेः नदिरदिम्यांएणंताभ्यांक्तिपिरक्तरक्तउत्पायसिद्धेश्च संयोगस्यातत्रफलंतत्वात् संयोगादि

२४ लोपेकर्तव्येण्णलोपस्यस्थानिवद्भावेतनदग्रहस्यासंयोगांतलोपेवस्थानिवत्त्वनिषेधेनतत्प्रहस्याउक्तसिद्धेः नवका

ष्ठशगेवनस्ती तिभाष्यादयंप्रयोगोनास्तीतिवाच्यम् काष्ठशकस्यातेस्यत्रजल्पवसंयोगादेः ककारस्यलोपश्चाशंक्य

नयोक्तत्वाच्चत्रककारस्यसंयोगादिलोपप्रसक्तिस्तत्रैवानभिधानस्योक्तत्वात् अत्रचणिलोपस्यस्थानिवत्त्वेनतदप्र

संगात् अतएववकांतेभ्यः क्विबुनास्तीतितत्रव्याख्यानात् लवेयथानिगार्यतेनिगाल्यते णिलोपस्यस्थानिवद्भावादवि

विभाषेतिलत्वविकल्पः अथप्रत्ययलक्षणेनैवलत्वं नचवर्णाश्रयत्वंधातोः स्वरूपेतत्प्रत्ययेकार्यविज्ञानात् अत

श्चश्रौणहस्येतिनकारनिपातनेनतापयिष्यते यस्याअनंतरगतयाणिलोपात्पूर्वमेवलत्वमितिचेन्न मैवं प्रत्ययलक्ष

णसूत्रंतनव्याहृतिमात्रफलकम् स्थानिवद्भावस्तस्थानिवत्त्वेणौचेतिभाष्येवक्ष्यमाणत्वात् अजादिप्रत्ययनिमित्तके

लत्वेचविशेषणतयाश्रलाश्रयणादनाल्विधाविति निषेधात् नाप्यनंतरमत्वेनसिद्धिः अकृतव्यूहपरिभाषाविरोधा

त् किंच उपसर्गस्यायताविति सूत्रे तिपरत्वं उपसर्गस्यविशेषणंरेफस्यवेतिपदद्वयम् आयेप्लायतइतिलत्वा

र्थस्थानिवद्भावापयोगश्चावश्यकः अन्यथापकादेशेकृतेपौर्वापर्यरूपव्यपवर्गाभावात्

अयातिनिष्ठपरत्वनिरूपितपूर्वत्वशालिनउपसर्गस्येतितदर्थात् उभयतआ

श्रयेचांतादिवद्भावनिषेधात् द्वितीयेपकादेशस्यपरादित्वे

नग्रहणात्तेरेफापेतयाः यतेःपरत्वेनलायतइत्यस्य

सिद्धावपिपल्ययतइत्यत्रलत्वंनस्यात् यकारेणव्यवधानात् नचवचनसामर्थ्यंप्लायतइत्यत्रसावकाशत्वा २५

त नवनत्रापि स्थानिवद्भावादकारेणाव्यवधानं पूर्वत्रासिद्धेन त्रिषेधात् णत्वविधौ स्थानिवद्भावप्रतिप्रसवेन
येन नाव्यवधानन्यायेनोभयत्र णत्वसिद्धिरिति दिक् ॥ णत्वं माषवपनीति भाष्यं प्रातिपदिकान्तेति सूत्रेण
समासान्तस्य नकारस्य णत्वं विधीयमानमल्लोपस्य स्थानिवत्त्वनिषेधान्नीवृत्तनेः प्राक्समासविधाना
त्प्राप्नोतीति कैयटः अत्र प्रतिवर्तिष्यते बहिरङ्गतया लोपस्यासिद्धत्वान्नकारस्य प्रातिपदिकान्तत्वाभा
वात् प्रहिणोति प्रमिणातीत्यादौ चैकदेशविकृतन्यायेनैव हिनुमीनेत्यस्य प्रवृत्तेः न च प्रियाह्नस्य च ण
त्वनिवृत्तिसिद्ध्यर्थमिदं कार्यकालपक्षे बहिरङ्गतयैवासिद्धेः एतेन प्रियाह्न इति णत्वस्वीकारपरः पदम
ञ्जरीग्रन्थोऽपास्त इति तदसत् तत्र णत्वस्य पूर्वमुपपादितत्वात् यत्तु तिनेरंतश्च इति सूत्रे हेपाणु इति णत्वार्थेप
दान्तस्येति निषेधवाधाय अन्त इति योगविभक्तपदान्तस्याऽन्ते णत्वं विधीयते यदा समीपार्थमन्तशब्दमा
दाय निमित्तसमीपवर्तिनो इति नकारस्य तादृशस्य वानिनेर्नकारस्य णत्वं योगविभागं विनापि सिद्धं आ
ये प्राणिनी माषादावेकेनाकारेणाव्यवधानेप्यारम्भसामर्थ्यान्न णत्वं द्वितीयेन एकादेशस्यादिवद्भावाद्व्यपाद
व्यवहितस्यानितेः संभवान्न सिद्धं यद्यपि तीत्यत्र तद्द्वयेनैकेन वा व्यवधानान्न णत्वमित्यष्टमे व्याख्यातं तथाहि ण
त्वग्रहणेन यथेति तीत्यत्रैव प्राणिणीत्यत्रापि द्वाभ्यामेकेन वाऽवर्णेन व्यवधानाभावेन स्यात् न च वचनसामर्थ्या
निरणिणाति दुरणिणातीत्यत्र चारितार्थ्यान्न नैवं निर्दुरोरनितेरित्येव ब्रूयादिति वाच्यं प्राणीतप्रभृत्युपसर्गत्वाभावे
पि णत्वापत्तेः निराणयतीत्यत्र निरोणपूर्वविशेषकत्वेन णत्वस्यानिष्टत्वात् किं च क्विवन्तादनितेरन इति पुंस्यौ
निरादयः क्रान्ताद्यर्थे इति समासेऽभसंज्ञायामल्लोपे निर्न इत्यत्र णत्वं स्यात् हे प्राणिन्नत्र णत्वप्रतिप्रसवव्याहतम्

प्र·
सि·ह·

र्थं अन्तरलाघवाच्च अंतरङ्गस्यैव प्रवृत्तत्वात् तस्मादाष्टमिकभाष्यालोचनयात्र गुणत्वग्रहणं न कार्यमिति तदप्य
सत् तन्मात्रपरत्वे गादनितेरित्यस्यैवापत्तेः गांताडुपसर्गात्त्वरस्यानितेर्णा इति व्यपदेशान संभवात् अनितेरित्यंशस्या
हस्यैव प्रयोजनांतराभावात्स्वदांतस्येति निषेधस्यापवादसंभवाच्चेति दिक् यद्यपि नत्वेनेत्यत्र योगविभागादसि
द्धत्वाद्याश्च निमित्तत्वमाश्रित्यस्थलत्रये स्थानिवत्त्वं संसाधनयापि ताहृशादिशेषसङ्ग्रहनयावार्तिकारंभ एव श्रेया
न् "द्विर्वचनेचि" द्वित्वनिमित्तमचमाश्रित्य कृतोजादेशः स्थानिवत्स्यात् द्वित्वे कर्तव्ये अचः परस्मिन्नित्यनेनानादिष्टा
दचः पूर्वस्य विधावेव प्रवृत्तेः सा चुकस्य द्वित्वे कर्तव्ये अप्राप्तः स्थानिवद्भावो विधीयते निमित्तापेक्षया पूर्वविधावि
ति पदेपि द्विर्वचनविधौ [illegible] स्थानिवत्वनिषेधादिति कैयटः रूपातिदेशस्यायं चक्रतुः चक्रुः इत्यन्तस्य इति
स्थितेयण् पश्चाद्रूपातिदेशेन कृ इत्यस्य लिटि धातोरिति द्वित्वं कार्यातिदेशस्वीकारेण यणादेशे सति प्रवृत्तेरन
चकत्वात् यकारो विहितेद्विर्वचनेन प्राप्नोतीति स्थानिवद्भावादनेन सूत्रेण यणसहितस्यैव द्विर्वचनं स्यात् रूपाति
देशत्वे च प्रमाणं वक्ष्यते अत्र पंच पूर्वपक्षाः संभवंति तथाहि अचीमादेशोपलक्षणं द्विर्वचन इति विषयनिर्देशः
अचि योजादेशः स द्वित्वे स्थानिवदिति प्रथमः द्विर्वचन इति विषयनिर्देशः तस्मिन्कर्तव्ये स्थानिवद्भवत्यचि परे
इति द्वितीयः द्विर्वचनपदमर्शआद्यजंतं अधिकरणल्युडंतं वा द्वित्वनिमित्तत्वविशेषितेचान्यग्रहणं स्थानिवद्भाव
विशेषणं अजादेशः स्थानिवत् द्विर्वचननिमित्ते चि परे इति चतुर्थः द्विर्वचनग्रहणमावर्तते एकेनाच् विशेषणे
तेनच स्थानिवद्भावो विशेष्यते अपरेण विषयो निर्दिश्यते द्वित्वे कर्तव्येऽजादेशः स्थानिवत् द्विर्वचननिमित्तेऽचि २५
परे इति पंचमः अत्र नाद्यः द्वित्वनिमित्तत्वरहितमचमाश्रित्य कृतस्याप्यजादेशस्य स्थानिवत्त्वप्रसंगात् अचो हि

त्वनिमित्तत्वेनाऽविशेषितत्वात् ननु स्याऽविकीर्तन्नृ इत्यत्र णिविपरे कृते न स्वउपधायां चेति ऋकारस्यानिकस्य इकारादे
शस्यापि स्थानिवत्त्वे चरीति कृ इत्यस्याहित्वे उरदित्यत्वे च अचकीर्तदिति स्यात् भवतमिच्छतीति क्यजन्तात् लु
टि कृते योगुणो वादेशयोः स्थानिवत्त्वे तु भवतीयिषतीति स्यात् न द्वितीयः उपूषतीत्यादि दोषद्वयनादवस्थानात्
अविकीर्तदित्यत्र इत्त्वस्य तकारव्यवधानात् न दोषः स्थानिवद्भावभाजो ह्यादेशस्य स्थानिवत्त्वविधानवेलायामव्य
नंतरे स्थानिवत्त्वेन भाव्यं न चैवाविपरत्वस्तु ह्रि यि निर्वाहात् एवंपपाविस्यत्र आत औणल इत्याकारेण सहपाशह
स्य हकारस्य प्रत्यादेशस्य रोन्नाप्लीति स्थानिवत्त्वेन स्यात् जग्मतुरित्यादौ गमहनेत्य उपधालोपस्य व्यवहितत्वान्नस्यात्
न तृतीयः कालावधारणविरहे द्वित्वोत्तरमपि स्थानिवद्भावस्यानप्रसंगात् न चतुर्थः पपाविथ इत्यादि दोषसाम्यात्
कालावधारणाभावाच्च न पंचमः जग्मतुरित्याद्यनुपपत्तेः लोपप्रतियोग्यपेक्षयाऽतस्यादेरव्यवहितपरत्वाभावात्
न षष्ठः उक्तरीत्या पूर्वव्याख्यातमेव युक्तं तथाहि द्विर्वचननिमित्तत्वेनाविशेषणादचिकीर्तदित्यादौ नाऽतिव्याप्तिः इ
त्वणिचोर्द्वित्वे च वस्तो निमित्तत्वात् आदेशोपलक्षणाच्च पपाविथेत्यादौ नाऽव्याप्तिः पुनर्द्विर्वचनोपादानाच्च कालावधार
णलाभाद्द्वित्वोत्तरमादेशावस्थानम् अथ द्विर्वचननिमित्ते विपरे विधीयमाने स्थानिवत्त्वं च कृतं इत्यादौ न स्यात् अत
सो द्वित्वनिमित्तेऽपि तदवयवस्याऽकारमात्रस्य तन्निमित्तत्वविरहात् न वारंभसामर्थ्यं चकार चक्रे इत्यादौ द्वित्वय
णनिमित्तयोरेकमात्रपर्याप्ततयात्व वरिनार्थत्वात् यदि तु परस्मिन्निमित्तत्वं अज्ञेन आचीति विशेषणं व्याख्येयं यस्मि
न्विधिस्तदादावल् ग्रहणे इति अजादौ परस्मिन्निति चक्रे इत्यादौ न व्यपदेशिवद्भावादजादित्वमिति कल्प्यते एवमपि
तन्निर्वाहः अजादेर्द्विर्वचननिमित्तत्वेऽपि यणः प्रत्ययस्य च एव निमित्तत्वात् पपतुरित्यादावेव न स्यात् आतो लोपे हि
त्वे च अतुसो निमित्तत्वात् वस्तुतो विधेयोपरिभाषोपतिष्ठते नानुवादे इति न्यायेन यस्मिन्विधिरिति परिभाषाप्रह

प्र॰
सि॰ द्व॰
26

तिरेवदुर्लभा अवियोगादेशस्यस्थानुवादत्वात् अत्रोच्यते अविप्रस्तो हि वचने हष्टमित्येतावतैवा वो हिर्वचननिमित्तत्व
मत्र तत्राहुः तद्भावभावित्वमात्रेणेह निमित्तत्वमिति तन्न यावमात्राहास्य मदायचटकतया तत्रादेशस्यानुवादतया
तद्विशेषणत्वादवीत्यस्य न दादिग्रहणपरिभाषाया अप्रवृत्तेः द्वित्वोपयोगित्वमात्रेण विवक्षितमिति यत्तु हिर्वचना
त्प्राः प्रत्ययाद्रावीत्यनेन विशेष्यते परस्मिन्निमित्तत्ववतेने अमीषामध्ये देवदत्तात्परमानयेत्युक्ते यथा सजातीयेन मनु
ष्यान्तरेणाव्यवहितः परमानीयते तथेहापि प्रत्ययान्तरेणाव्यवहितपरो गृह्यते तेन द्वित्वनिमित्ते अजादौ प्रत्यये अन्य
प्रत्ययान्तरेणाव्यवहिते सति योः ज्ञादेशः स स्थानिवदिति सूत्रार्थः वक्ष्यमाणज्ञापकबलेन णिवाव्यवहिते प्रवृत्ता
वपि दिदिवनी पिषतीत्यादौ अनेकप्रत्ययव्यवधानान्नातिप्रसंगः अपीप्यदित्यत्र वर्णव्यवधानेपि प्रत्ययान्तराभावा
त्प्रवृत्तिः अनुवादे परिभाषानुपस्थानेपि निर्दिष्टपरिभाषालभ्यार्थसिद्धिश्च अत एवेह परस्मिन्निमित्ते न वर्तते इति मा
धवकारः द्विर्वचनेन प्रत्ययाक्षेपेण भिन्नप्रत्ययव्यवहिते ज्ञापकस्याः प्रवृत्तिं वदनः कैयटस्याप्ययमेवाशय इति
तत्र यत्किञ्चिदिति परिभाषाप्रवृत्ते र्दुर्लभत्वात् निर्दिष्टपरिभाषाप्रवृत्तिं विना तदर्थस्यानुपपत्तेश्च तथाहि अ
मीषामिति निर्धारणे मनुष्यत्वस्य प्रतियोगितावच्छेदकतया तद्विषयस्यापि मनुष्यत्वलाभात् परं शाहस्य चाऽ
व्यवहितपरार्थकत्वात्तथालाभात् प्रकृते च यदपेक्षमव्यवधानं तस्य प्रत्ययत्वग्राहकाभावात् ऊर्णुनविषती
त्यर्थं तद्भावभावितामात्रेणोत्यस्या वश्यमाश्रयणीयत्वाच्च तथाहि ऊर्णोतेः सनि सनीवन्तेति इट् विकल्पेन इट् सह इति स्थि
ते विभाषोर्णोरिति ङित्वविरहे गुणावादेशौ सम्प्रज्ञेति निसनं तत्सहित्वविधानेपि सनो हित्वप्रयोजकतया तस्मिन् कृ
तयोः स्थानिवत्त्वानुशाहस्य द्वित्वे अभ्यासे उकारश्रवणं अत्र हि इट्भावे इकोऽफलितत्सनः किन्त्वाद्यस्याग्रणाविरहात् २५
इट्सन्निष्फलादित्वविघटकत्वेन गुणानिमित्तत्वे अवादेशे तत्स्पष्टमेव द्वित्वनिमित्तं तत्सत्त्वेव तत्र विशेषणान्तरा

पादानात् तथा च निमित्तकोटाविव प्रविष्टस्याप्यवलत्रविद्यमानत्वमात्रेण निमित्तत्वमाश्रित्यैव तत्र गुणादेः स्थानिव
त्वमिति नैवं अरिरिषतीति न स्यात् अर्थात्तोः सनि मिमृ इत्यंशं सनी ति इट् इति गुणे च तस्य अतश्शब्द निमित्तकस्य
स्थानिवत्त्वे अनादेर्द्वितीयस्येति इत्वोऽद्वित्वप्रसङ्गाभावात् अरीरिषतीति रूपप्रसंगात् रिसइत्यस्य द्वित्वं न तत्रेष्टमिति चेन्नैवं
इत्यशब्दस्य कार्यित्वेन द्वित्वनिमित्तत्वाभावात् नहि कार्यी निमित्ततयाश्रीयते शयितरीति ज्ञापकात् शीङो ङि.
त्वेन गुणनिषेधापत्तेः नैवं ऊर्णुनविषतीत्यपि न स्यात् सन्नन्तस्य धित्वविध्यविशेषणेन तत्रापि नु इत्यस्य
निमित्तत्वासंभवादिति वाच्यं मन्तव्यो येन इतिना कार्यो यद्वितस्यैव निमित्तत्वनिषेधात् ऊर्णोतेर्नुशब्दस्यैव
प्रत्ययासत्तेर्द्वित्वानुपादानात् अरिरिषतीत्यत्र तु रिसशब्दस्य द्वित्वभागितया सतो द्वित्वोपद्वित्वमिति वैषम्या
त् नन्वेवं जेघ्रीयते देध्मीयते इत्यादावपि घ्रीध्मीइत्यादेर्द्वित्वभागितया यङोऽद्वित्वनिमित्तत्वाभावादेवानतिप्रसं
गेन तद्वारणार्थमचीत्युक्तमिति भाष्यहृत्यादिग्रंथाः कथं संगच्छन्तामिति चेन्न अनुस्वारो व्यंजनं वा स्वरांग मित्यसा
दनन्तरं स्वरांतव्यंजनान्मुस्वरस्येति प्रातिशाख्ये सूत्रितत्वात् वीयइतिसमुदायैकारस्योत्तरावयवतयाघ्रीइत्या
देरेव द्विरुक्तिरिति तदभिप्रायात् यदि नु षाष्ठवार्तिकभाष्यरीत्या नटभार्यावद्व्यंजनानीत्याश्रित्य द्वितीयैकाज
वयविकस्य द्वित्वं वर्णमाश्रीयते न तदा न अधिजगे इति अध्यगृहणस्य व्यावर्त्यं बोध्यं गाङ् लिटीति हि लकारकोर्दे
शमाश्रित्य लावस्थायामेव गाङादेशविधानमिति भाष्येऽभ्युक्तत्वात् ननु वार्तिकमते लिटीत्यादौ नापरसप्तमीत्वा
भ्युपगमाद्गाङादेशस्य परनिमित्तकत्वेऽपि भाष्यकृता विषयसप्तमीत्वाभ्युपगमात्रेदमपि प्रयोजनमिति चेत् हि
जग्ले इत्युदाहरणं अशितिप्रत्यये परे आत्वविधानात् अथार्नैमित्तिकमात्त्वं शिति तु प्रतिषेध इति वक्ष्यमाणरीति
राश्रीयते तदा अचीति नोपादेयमेव अयमसिः कस्तौच मिमसोरर्द्धलीप्सप्धालोपे कृते तस्य स्थानिवत्त्वनिषेधार्थम

प्र॰ स्त्वइति चेन्न अत्र कैयटहरदत्तादयः तत्र सत्यसति वा स्थानिवद्भावेन कश्चिद्विशेषः स्वानिति रूपसाम्यात् न च सति हित्वे
सि॰ सु॰ पकारद्वयमिति वाच्यम् हलान्तविधिश्छंदसि भवतीति सिद्धान्तात् भाष्ययोस्तु कहइ लेभ एव उपधालोपश्छांद
स एवेति अचीत्यत देव रूपातिदेशे प्रमाणं कार्यातिदेशे तु ओ गाग्लाइत्येषामेव हित्वेन भाव्यमिति तत्र स्थानिवद्भाव
२७ निषेधार्थस्य अचीत्यस्य वैयर्थ्यं स्यात् रूपातिदेशस्वीकारेण ग्लाइग्लेइत्येषां हित्वापत्तौ इष्टरूपं न सिध्यतीति तत्र
स्थानिवद्भावो मा प्रवर्तिष्टेत्येतदर्थकत्वयत्नस्यार्थक्यम् तदुक्तं अन्यग्रहणं तज्ज्ञापकं रूपस्थानिवद्भावस्येति अन्यग्रहण ६१
प्रत्याख्यानपक्षे तु स्थानिवदिति शब्दाधिकारमाश्रित्य स्थानिवत्सूत्रे कार्यातिदेशपरत्वेन निश्चितस्यापि स्थानिव
द्भावस्यात्र लक्ष्यानुरोधाद्रूपातिदेशपरत्वकल्पनं तत्र व इत्यादेशविशेषणं किमर्थमिति चेन्न अशुशावेत्यत्र ह्वयावादे
शयोरिव संप्रसारणस्यापि स्थानिवत्त्वे शिशाहित्वेन सहसमाननिमित्तकत्वमेव नेति वाच्यं शुशुवानेइत्यादौ
दोषस्य तथापि तद्वारत्वात् विभाषाश्वेरित्यस्य लावस्थायां प्रवृत्तावपि इंजातेइंगाघेइत्यादौ अतिप्रसंगसत्त्वात् कि
त्वस्यादेशविध्यनंतरप्रवृत्तिकत्वात् न च तस्यापि लावस्थायामेव विधिरस्त्विति वाच्यम् अंतरंगैरादेशैर्बाधितत्वात्
स्वापेश्चङीति संप्रसारणस्य स्थानिवद्भावेन संप्रसारणे संप्रसारणमिति निषेधाद सुष्वपदित्यत्रासे उवर्णान्तपत्व
त्वेऽप्यवश्यं तेन सुषुप्सतेरेव हित्वेन तत्सिद्धेः हित्वकर्तव्ये इत्यस्मात्तदुत्तरमादेशरूपस्येवावस्थानं अन्यथा प्रक
तिभाव एव स्यात् नियतं हिम्नादौ तु पूर्वमियङ्प्रवृत्तावपि हित्वेन तं प्रति नेकावइति तदपवादो यणा यद्दापकल्प
वाद विषयेत्ततदुत्सर्गोभिनिविशतेइति न्यायात् पूर्वमेवश्यङ्प्रवर्तते आभीयत्वेन श्यङोऽसिद्धत्वाद्धा यणिति वो
ध्यं स्यादेतत् स्थानिवद्ग्रहणं निवर्त्य नपदान्तेतिसूत्रात्तज्ग्रहणं वा नवर्त्यं उकस्य लेऽज्जादेशनिषेध एव व्याख्यायतां १
भाष्यानुरूपत्वस्यालाभात् स्थानिवदित्यत्र शब्दाधिकारत्वानाश्रयणेन लाघवात्तपदान्तसूत्रानन्तरपाठानुग्रहाच्चेति २०

मेवं नकारस्यस्वरितत्वाद्याप्यत्रापि कल्प्यत्वात् स्थानिवद्भावेवतस्मात्ःक्रमत्वात् अत्रपदादेशपदयोरनन्तरस्यार्थे प्रवर्तते
सूत्रान्तसंधानकल्पनस्यावशाकतत्वयानपदांतेतिसूत्रान्तसंधानकल्पनेगौरवाच्च स्यादेतत् हित्वनिमित्तमवमाश्रि
त्यकृतस्यैवाःजादेशस्यस्थानिवद्भावविधाने चुतावपिषतीत्यादौणिनिमित्तकस्यहत्वावादेशादेत्वदनुपपत्त्या
अभ्यासेउकारस्यअवर्णेनस्यादकारस्यैवतस्यसंगातएवंउङ्गुत्रवपिषति उडुरिवाचरतिउडवति एवंतात्सन् चडि
औडुडवत् नुनावपिषति अनूनवत् औशिनावत् पुस्फारपिषति अपुस्फरदित्यादि विस्फोरणंविस्मापयदिति वे
त् अत्रवार्तिके ओः पुयण्जिष्वपरे तापकेणौस्थानिवद्भावस्येति अस्यार्थः ओः पुयण्ज्यपरे इति सूत्रेणअभ्या
सोकारस्यइत्वंविधीयतेपवर्गयणजकारेषुवर्णपरेषुपरतः तत्रयद्यपिपिपविषतेयियविषति इत्यत्रप्रकृतेयो
तेष्वसतिनिमित्तेइत्वशास्त्रमितिसनीवंतेतिवद्इ गुणावादेशौ हित्वेकृतेप्येद्विर्वचनेवीत्यस्यग्रहणात्अभ्यासेउकारसं
भवात् नस्यइत्वविधानेनपकारयकारांशःसार्थकएव तथापिवर्गप्रत्याहारजकाराणांग्रहणंणौकृतस्याजा
देशस्यस्थानिवत्त्वंज्ञापयतीति आदेशविशिष्टानामेवहित्वेअभ्यासेउवर्णस्यअप्रसिद्धेः अभ्यासोकारस्य सम्पत्त
इतिइत्वस्यासिद्धेस्त तद्व्यतिरेकेणपवर्गयणजकाराणांअवर्णपराणांदुर्लभत्वात् सतिचैषामसिद्धोदुर्लभत्वात्
अवीभवत् अमीमवत् अलीलवत् अरीरवत् विभावयिषतीत्यादिनयावद्हित्वनिमित्तस्याणेराश्रयविधाने
सत्यपिणिनिमित्तकस्याप्यजादेशस्यस्थानिवद्भावेसिद्धेचुतावपिषतीत्यादिकंनिर्बाधं येननाव्यवधानन्या
येनहित्वनिमित्तस्याणेरार्णोऽभात्रेणव्यवधानमाश्रीयतेनननिनवनीयिषतीत्यादौतद्टकरजादिभिरेतिनानिप्र
संगः अतएवणौकृतंस्थानिवदितिपठंति नत्वेवमविकीर्तेदित्यत्राणिचिकृतस्यइत्वस्यापिस्थानिवत्त्वस्यात्
मेवं अवर्णपरएवहलिस्थानिवत्त्वानुमानात् तथाचभाष्यं नसजातीयस्यज्ञापकंकस्यचनसजातीयः यथा

प्र॰ सि॰ सु॰ जातीयकाः प्रयाणजयः कथं जातीयकाश्चैते अवर्णायरा इति वार्तिककारस्तु सूत्रमेतत्प्रत्याचख्यौ तथा हि षष्ठे द्वित्वप्रकर
णान्ते पठ्यते द्विर्वचनेयणयवायावादेशाल्लोपणिलोपोपधालोपकिकिनोरुत्वेभ्यः पूर्वविप्रतिषेधेनेति अस्यार्थः
दध्यत्रेत्यादौ सावकाशो यण् चयनं वायकोलवनं लावक इत्यादौ अयायावादेशास्तु वारं गोदः कंवलद इत्यादावा
ग्र॰ लोपः स्नेयिम इत्यादावुपधालोपः कारणाहारणेत्यादौ णिलोपः निपूतेत्यादावुत्वं च किरतीत्यादौ ऊजरञ्ञा
२८ ति॰ नोरितीत्वस्याप्येतदुपलक्षणं तेन तत्रिरित्यादिकमपि सेत्स्यति द्विर्वचनं तु विभेदतुरित्यादौ सावकाशं तथा चोभयप्रसं
५॰ गे पूर्वविप्रतिषेधात् द्वित्वं तेषां वाधकं तेन चक्रतुः चिचाय लुलाव चिचयिथ लुलविथ पपतुः जग्मतुः जक्षुः आटि
टत् पपुरिः ततिरिरित्यादिसिद्धौ न चैवं इयङ्गोवानपातानाविव्यतुरिति न स्याद्धितिवाच्यं प्रकस्यैवेतिस्थानेनभावि
नो यणमालोप्य पूर्वं ध्वस्तु प्रवर्तत इत्युक्तत्वात् तस्मान्नारंभणीयमेतद्वचनमिति भाष्यकारस्त्वाहुः विप्रतिषे
धोपमप्युक्तः आल्लोपादीनां नित्यत्वात् द्वित्वस्यानित्यत्वेन तत्स्ववलत्वाभावात् अथाऽपूर्वोयं वाचनिको विप्रति
षेधस्तेतान देवगौरवं अपि च नित्यानामिवांतरंगाणामपि वचनेन वाधापत्तौ निनवनीयिषती त्यादावल्पाते
उकारश्रवणं स्यात् अथ नित्यानामेवोक्तवचनं वाचकं नत्वंतरंगाणामपि तथापि वुलावयिषतीत्यादौ ह्रस्वादे
रंतरंगत्वात्पूर्वं प्रवृत्तौ ततो द्वित्वे अभ्यासस्य रुक्त्वे सत्यत इति इत्वे वकारस्य श्रवणं स्यात् तथा चतद्वाधनाय उत्व
स्यातः तित्व इत्युत्तरं ओदौद्रादेशस्य वुटत्तुशरादेरिति वचनं कस्य अभ्यासस्येत्यनुवर्तते अस्यार्थः ओदोता
रादेशो यस्मिन्नंगे तत्संबंधी वुटत्तुशरादिश्च यो अभ्यासस्तस्य योऽकारस्तस्य उत्स्यादिति वुलावयिषति उत्तुवयि
षति नुनावयिषति ऊर्णुनावयिषति शुशावयिषति पुस्फारयिषति ययं यथेशार्पूर्वः खयः इति पकारशेषस्यारा ष
दित्वं नास्ति तथापि अभ्याससंज्ञाप्रवृत्तिकालेन द्वोष्ठ्य ओदौदादेशस्य किं वाद्यप्रजायां विचायिषति खद इत्येवंविव २८

दिषति चुट्टत्तशरादेः किं विभावयिषति अत्तः किं अत्तुंअशाणि अंतुंअंशुं वाश्राखत आर्जिजत आर्णिणत आर्तितत अं
शिशत् अत्रपरत्वाद्धौ टिलोपस्तस्याणि स्थानिवत्त्वमाश्रित्य अभ्यासस्येत्वत्कोत्त चुट्टत्तशरादेरिसंगस्याऽतो वा विशेषणं
स्यात् तथा दधीनेल नातिशीतलः सर्वः तस्मात्प्रयोगमिच्छति शिशीतलयिषतीत्यत्र तकारोत्तरस्याऽकारस्येत्त्वं
स्यात् तस्माद्वचनद्वयमपि वार्तिककृता पठनीयं ॐः पुपराजपरश्चापि तथैव पिपविषते पिपविषति जिजा
वयिषतीत्यादौ इत्वं यथा स्यात् पुयुज्यनयोः सतिशिष्टपरत्वाद्गुणो पूर्वविप्रतिषेधेनाऽवादेशात्पूर्वं द्वित्वस्यत
न्नतेप्रहृतेः गुवंकस्येत्यत्र निर्दिष्टः सौत्रोऽत्र धातुः तस्मात्स्यनान्तस्य न तत्र चुट्टत्तशरादेरित्वं प्राप्नेन बाधनायर
त्वस्य वक्तव्यत्वात् नव चुट्टत्तशरादेरित्यत्र तु शाहस्थाने चकारमात्रं पठनीयं तथा च नाशातिप्रसंगः इति वाच्यं
गुङ् चुङ् ध्वनौ णिचि चटि सति च अजूगवत् अजूचवत् जुगावयिषति जुगावयिषतीत्यादेरसिद्धेः एवं हि
दवनीविषतीत्यत्रापि तवर्गादित्वाज्जुत्वं वारणाय वचनान्तरमारंभणीयं अथवा स्यनइत्यस्मान्नं इकलन्यास
न्ग्रहणमनुवर्त्यं येन नाव्यवधानं न्याये नाणिज्भित्रव्यवधाने इत्वं नेति व्याख्येयं नत्वेवमपि नत्र शब्दाद्वाचारक्कि
वंताद्रेत्तमसोसत्यसतिवासन् तितनावयिषति तितनविषति इत्यत्राप्युत्वं स्यात् मैवं अभ्यासस्यावयवः
ओष्ठ्याद्देशस्य तु यथा संभवमवयवश्चादेशो वा योः कारस्य उत्वमिति वार्तिकार्थः चुतावयिषतीत्यवयवः
पुस्फारयिष्यतीत्यादेशः तितनावयिषतीत्यत्र तु तदुभयाभावान्न दोषः एवं च तत्रभ्यसापि सार्थकं अयम्प्याप्राति
टहित्यादौ च ङ्परे णौ प्रसंगं तद्वयवेलचौत्सत्वदति देशादार्जिजदित्यादावतिप्रसंगाभावेन न तैयर्थ्यं स्यादिति
सूत्रापेक्षया वार्तिकमजेमहागौरवमिति स्यादेतत् प्रकृतसूत्रं वार्तिकं चेत्युभयमपि मास्तु ॐः पुयणिस्य वज्ञापकं
अंतरंगानिसंचवाधित्वा द्विर्वचनं भवतीति द्वित्वान्तरं वयथासंभवं यणादिप्रवृत्तिरिति अत्र कैयटः ज्ञापकसामा

म॰ ऽपेक्षत्वविशेषापेक्षत्वा नायः अविकीर्तदित्यादौ श्रत्वं वा त्वाश्पूर्वं ह्रित्वप्रवृत्ता वभ्यासे अकार अवर्णापत्तेः नान्यः चकृतदि
सि॰ स्व॰ त्यादेरसिद्धेः तस्मात्सूत्रमावश्यकं तद्विषये चेह सिद्धं यं भाष्योक्तरीत्या ज्ञापकमाश्रयणीयमिति दिक् अत्र चोपदे
देन कार्यकामयेनाविर्त्यंभवस्थापितं अंकयते श्चङ्णिचमाश्रित्यकृतस्य अतोलोपस्य स्थानिवद्भावात्कश
हृस्यहित्वे श्रावकदिति रूपमेके स्वीकुर्वन्ति तन्नमनित्रयविरुद्धम् तथाहि किं द्विर्वचनेचीति स्थानिवत्त्वे ज्ञापके
नवा नायः णिचो हित्वनिमित्तत्वाभावात् द्विर्वचनाहस्याहित्वनिमित्तमचमाश्रित्यकृतस्यैव अजादेशस्य स्थानि
वत्त्वमिति भाष्यवार्त्तिकयोरुक्तत्वात् नान्यः ज्ञापकस्य सजातीयविषयकत्वमाश्रित्य अवर्णपरएव हलि स्थानि
वत्त्वमिति भाष्य एव स्थापितत्वात् पूर्वविप्रतिषेधवार्त्तिकदूषणपरभाष्यप्रामाण्यादेव तथालाभात् श्रावकदित्यादा
वभ्यासे अकारस्य भाष्यसंमतत्वे हि तदर्थमपि वार्त्तिककृता यत्नान्तरं कल्पनीयमिति गौरवमप्यापादयेत् तदभावा
त्तु ज्ञायते ऽभ्यासे इकार एव भाष्याभिमत इति अल्लोपस्य स्थानिवत्त्वमनभिमतं इति तस्मादुकारादेश एव स्था
निवत् अभ्यासान्तरस्य अवर्णपरहलत्वैवसंभवादिति सिद्धं यत्तु काशिकायां पूर्वत्रासिद्धमिति सूत्रे उड्ढश
ह्मासिविचङि ओजढदिमदाहस्यत्रौनत्यन्वै जिढदित्युक्तं यासकृतावर्णोक्तन्यदि लोपस्य स्थानिवद्भाव इति
व्याख्यातं सरस्वतीकण्ठाभरणकारेण चाणिच्यनिदिति सूत्रितं तत्सर्वं महाभाष्यविसंवादान्निर्मूलं इदमेव दुर्गसिंहेन
दुर्गटीकायां त्रिलोचनदासेन कातन्त्रपञ्जिकायां वर्द्धमानमिश्रेण कातन्त्रविस्तरे हेमसूरिणा हैमव्याकरणे प्रदर्शितं
एतच्च ज्ञापकमन्तं तस्यापवर्गपरस्यावर्णएवेति वेदितव्यमिति प्रदर्शितं अभिनवशाकटायनेन च शब्दानुशासने
णिनिमित्तादपि प्राग्हिः तच्चावर्णपरे इति प्रदर्शितं तस्मादंचिकत् ओजिढत् इत्येव साधीयः तथैव नन्दिक्षीरस्वाम्या २८
दिभिर्धातुपारायणे हृदाहृतम् शुचिकास्मकंजं चावदातिमा नौजिढत् येति वे याञ्चयवार्त्तिके पिइकारपाठएव

वसांप्रदायिकः श्रोत्रियात्तु प्रमादाल्लिट्स्थाने जं पठंति हेमेंद्रेणापि जैनेंद्रव्यासेस्तृष्टमेवोक्तं इति वैयाघ्रपद्यवार्तिकं च सर्व
त्रासिद्धमित्यस्य प्रयोजनाभिधानपरं तथाहि शुष्किकेत्यत्र उदीचामातः स्थानेयकपूर्वाया इति इत्वविकल्पो न भवति
शुषः कः इति निष्ठाकत्वस्यासिद्धतया ककारस्याकारात् पूर्वत्वाभावात् एवं शुष्कजंघेत्यत्र नकोपधाया इति पुंवद्भावनि
षेधस्य न प्रवृत्तिः क्षामिमानित्यत्र मादुपधायाश्चेति वत्वं न भवति आयोम इति मत्वस्यासिद्धतया मकारस्यानुपधात्वात्
औजढदित्यत्र ढत्वस्यासिद्धत्वात् ढत्वस्य सद्धित्वं अत्र वदंति वोपदेवमहाग्राहग्रस्तो वामनदिग्गजः कीर्तेरेव प्रसंगेन
माधवेन विमोचितः तथाहि किं वामनोक्तौ वार्तिकहृषणपरभाष्यविरोधः किं वा ज्ञापकस्य सजातीयविषयक
त्वं वर्णान्तरपरभाष्यविरोधः नाद्यः निष्ठानिमयोर्विप्रतिषेधानुपपत्तिरिति दयनीयिषतीत्याद्यसिद्धिश्चेति हृषणाद्यो भा
२१ ष्येनुक्तत्वात् हृषणान्तरोपलक्षणं भाष्यमिति स्थिते औजढदित्यभ्यासेः कार्यसवर्णार्थं सोपि विधेयः स्यादिति हृषणान्तरस्या
पि वार्तिकोपरिदेयत्वात् तदेवं वार्तिकं रचनीयं आदौ दादेशस्य चुत्वशरादेरभ्यासस्योन्नत्वानि ततः अल्लोपवतो णि
चोऽत्र अल्लोपवतो गस्याभ्यासस्य णिचोः तस्मात् औजढत् आवकादिति न द्वितीयः यत्र हि रुक्तौ अभ्यासो न रखंडस्य
आयोजनवर्णोस्तत्र स्थानिवदिति हि भाष्यस्य फलितार्थः अस्ति च रुतशहस्य हि रुक्तौ प्रक्रियादशायामन्तरङ्गः वर्णः
न च पुनः प्रहृत्तेन टिलोपेनापहारात्तत्र तस्य प्रयोगसमवाय इति वाच्यं प्रयोगसमवायित्वस्य भाष्येनुक्तत्वात् एवं च त
नावयिषतीत्यादौ द्वित्वप्रवृत्तिवेलायामवर्णाभावेपि पश्चाद्गाविनेतमाश्रित्य यणः स्थानिवद्भावस्तथा रुतशहस्य प
श्चान्द्विरहेपि तथाहि अवर्णपरत्वं द्वित्वप्रवृत्तिवेलायां विवक्षितं उत परिनिष्ठिते रूपे नाद्यः जुगुप्तावयिषतीत्यादावभा
वात् नान्त्यः आवकत इत्यादौ तदभावात् तस्मात्प्रक्रियादशायामेव तदित्यवश्यमंगीकार्यं एतेन वोपदेवोपन्यस्तग्रंथा
अपि व्याख्याताः प्रक्रियादशायामवर्णपरत्वस्य रतितत्वाद्वामनोक्तौ न विरोधाभावात् अप्यजीगपदित्यत्र तत्स्थानिवत्व

प्र॰ प्रवृत्तावजादित्वाभिच एव हित्वापत्त्याऽऽभयत्रापि वर्णपरत्वाभावात्स्थानिवत्त्वे अविकीर्तनं इत्यादिवत् एवं सत्यवर्णा
सि॰ सु॰ स्थानिकस्यैवादेशस्य स्थानिवत्त्वमिति डराग्रहो निर्मूल एव अत एव लोपः पिवतेरीच्चाभ्यासस्येति सूत्रेऽपि पिपठि
त्यत्र पिवतेर्णौ सुकि च ङिउपधालोपे च तस्य स्थानिवत्त्वात् पापृशब्दस्य द्वित्वमिति वृत्तिः संगच्छते तत्रैदं वक्तव्य
स्थानिवद्भावप्रवृत्तिवेलायां अवर्णपरत्वं यत्र हलोऽस्ति तत्रस्य आदेशः स्थानिवदिति भाष्याभिप्रायो न तत्र
द्विरुक्तमतरव गौरवात् प्रमाणाभावाच्च एतेन भाष्यस्य हर्षणोपलक्षणत्वात् लोप एव तो णाविवोत इति वचना
रंभोपायत्वेनाभिमतश्च यतास्ते वाचनिकविप्रतिषेधपरत्वेन प्रवृत्तं वार्त्तिके भाष्यस्य हर्षणोपलक्षण
त्वे प्रमाणाभावात् नित्यानित्ययोर्विप्रतिषेधानुपपत्तिरिति हर्षणस्य प्रसिद्धविप्रतिषेधपरत्वमात्रविषयक
त्वात् यत्तु उकारादेशस्यैव स्थानिवत्त्वे अविकीर्ने दित्यत्रातिप्रसंगशंका भाष्यमसंगतं स्यादिति तत्तु छौणा (?)
चिरूतं स्थानिवद्भवतीति यथाश्रुतार्थबोधदशायामेव तत्प्रवृत्तेः सिद्धांतविरोधेन शंकाया असंगतत्वाच्छ
कामात्रोच्छेदापत्तेः अन्यथाऽस्मत्पक्षेऽपि वर्णपरत्ववादिनस्तवापि तदसंगतेर्दुरुद्धरत्वात् तत्र प्रक्रियादशा
यामप्यवर्णपरत्वाभावात् एतेन प्रयोगसमवायित्वं विशेषणं भाष्यानुक्तमिति निरस्तं ऊ‍ऽउनावयिषतीत्या
दावपि स्थानिवत्त्वप्रवृत्तिदशायां अवर्णस्य हलपेतयापरत्वात् कथं जानीयका (?) मैनेऽवर्णपर इति भाष्योक्तेश्च
युक्तं चैतत् अवर्णपरेषु पवर्गयणजकारेषु परतो विधीयमानस्याभ्यासोकारस्य इकारादेशविधानेऽपि स्थानिव
द्भावं ज्ञापयतीति स्पष्टमयसिद्धम् अस्ति वात्र स्थानिवत्त्वप्रवृत्तिवेलायां पवर्गादीनामवर्णपरत्वमिति यणो कार्थलाभा
त् अत एव तत्सजातीयस्य ज्ञापकमिति भाष्यं तेन तत्सजातीयस्य स्थानिवत्त्वमित्यर्थात् तत्प्रवृत्तिवेलायामवर्णपर
त्वस्य स्पष्टमेवोक्तत्वात् प्रथमोपस्थितं स्थानिवद्भावमुपेक्ष्य हि रुक्तावभ्यासोन रत्वेऽस्या योज्ञ वर्णरस्य परत्वेमाना १०

प्र॰

सि॰ स्व॰

31

भावात् एवं चालोप एव तोपि चोन इति वचनात् पार्ष्णनमपि इह रापास्तं अभ्यासे अकारस्य प्रमाणासिद्धत्वाभावे तदर्थवचनारंभस्य निः
फलत्वात् कृतयोः गुणस्य स्थानिवद्भावात् सिद्ध शाह्नहित्वमिति न्यासकारेणोक्तं तन्नोत्तरत्वं उ अकाराभावेन तत्वङ्क्रीसा
श्रोनद्धदित्यत्र तत्र स्थस्य व्याख्यातुमशक्यत्वात् एतेन सिचो हित्वमिति न्यासस्य भाष्यविरोधादुपेक्ष्यत्वमिति निरस्तं श्रोज प^
द्धदित्यत्राप्यल्लोपस्य स्थानिवत्वस्य भाष्यविरुद्धतया स्वयमेव प्रक्रियादशायामवर्णापरत्वाभिप्रायं कल्पयित्वा अस्यैव तद्धि या^
रुद्धत्व वचनानर्हत्वात् अत एव श्रोजद्धदित्यादिसिद्धये सामामामापेदं ज्ञापकम् का अविकीर्तिदित्यायनरोधेन तद
नित्यत्वं सौरदेवेन स्वीकृतं तत्र सामासामामापेदं ज्ञापकमित्येव वामनन्यासकारादीनामभिप्रायेण तत्वङ्क्रमः एवं तु विशे
षापेक्षं ज्ञापकमिति भाष्यविरोधादेव तेषामनुपादेयत्वमित्यवदेव दिति रहस्यं अत एव अदंतेषु ग्र तयथातो माधवी
य धातुवृत्तौ नोनयति ध्वनयतीति सूत्रे काशिकापदमंजर्यो स्वश्रौनिनदित्यभ्यासे इकारपाठः संगच्छते एतेन
तत्सर्वं लिपिप्रमादप्रयुक्तमेव स्यात् तरस्य वामनमाधवग्रंथविरुद्धत्वादित्यपि निरस्तं भाष्यसंमतार्थसंवादिन
इकार पाठस्यैव वामनादितात्पर्यविषयत्वावश्यकत्वेन वैपरीत्यात् नन्वेवमकारेण तत्र वैयर्थ्यमिति चेन्न तद्फलेनेह
त्यादि^ दौ मत्सामेकापयतिश्रोंवाकपदिवृत्याभ्युपगमात् यदित्र विंतिरत्यादाविदित्करणस्यापि विकल्पज्ञापकतया कृत
मत्वादिहापि तथैवेत्याग्रहस्तत्थापि न ततिः गौणभावपदेऽनेकाच्त्वादाम् अकास्मिदादावनिदितामिति उभयथा लोपाप्र
हृतिरित्यतोपि सार्थकता निर्वाहात् यत्त्र अभ्यासे अकारश्रवणार्थतया अदंतत्वसार्थकमिति तन्निमित्ते इकारस्यैव तत्र
व्यवस्थापितत्वात् अपि सर्वमतेष्वभ्यासे नकारश्रवणानुपपत्तिः पूर्वत्रासिद्धमद्विर्वचनइति ढकारस्यैव द्वित्वा
दिति चेन्न तस्याः नित्यतयाइति शाह एव तत्र हतेरित्यास्तामतिविस्तरः ॥ इति श्रीसिद्धांतव्याख्यानिधौ प्रथमस्या
ध्यायस्य प्रथमे पादे अष्टममाह्निकम् ॥

